No. १३२२

Title आकांक्षा विचारः

Author श्रीरघुदेव भट्टाचार्यः

Extent १८ Age १८३३

Subject न्याय शास्त्रं

आकांक्षाविचारः
१३२२

न्याय स्रा कां द्वा विचार

५१०

॥श्रीगणेशायनमः॥सिद्धयंशाब्दाख्यविलक्षणप्रमायांतत्करणतयाशब्दज्ञानस्यस्वतंत्रप्रमाणताप्रत्यक्षानुमानोपमा
नशब्दाःप्रमाणानीतिसूत्रेशब्दपदंशाब्दज्ञानपरं॥अतीतानागतशाब्दानुसंधानेऽपिशाब्दबोधोसत्याशब्दस्यतद्धेतुत्वासंभवात्।
शाब्दज्ञानस्यचशाब्दत्वावच्छिन्नंप्रतिशाब्दज्ञानत्वेनवर्णज्ञानत्वेनवाहेतुतावर्णत्वंचध्वनिव्यावृत्तः।शब्दनिष्ठोजातिविशेषः।सा
मान्यसामग्र्याश्चविशेषसामग्रीसहितायाएवकार्योत्पादकत्वान्निराकांक्षादिशब्दज्ञानान्नशाब्दत्वरूपसामान्यधर्मावच्छि
न्नायत्तिः।तत्तदर्थविषयकशाब्दत्वावच्छिन्नहेतुभूतपदज्ञानजन्येनतत्तदर्थोपस्थितिरूपायास्तत्तदर्थविशेष्यकतत्तत्संस
र्गकतत्तदर्थप्रकारकशाब्दत्वावच्छिन्नहेतुभूततत्तदर्थोपस्थापकपदनिरूपितपरस्पराकांक्षाज्ञानादिरूपायाश्चविशेष
सामग्र्याविरहात्।अथैवंविशेषसामग्रीतएवनिर्वाहेकृतंसामान्य।कारणतयाविशेषसामग्रीजन्यतावच्छेदककोटौ रा प्र ॥१॥
शाब्दत्वनिवेशस्यावश्यकतयैवकार्यमात्रवृत्तिधर्मस्यकार्यतावच्छेदकत्वनियमोपपत्तेः।अत्रलाघवात्ज्ञानत्वेनात्म
त्वेनैववाशाब्दत्वावच्छिन्नहेतुतेतिचेन्नशाब्दज्ञानान्यशून्यकालीनशाब्दसामान्यानुसादेश्चानंतविशेषसामग्रीविरहकुट

स्यप्रयोजकत्वापेक्षया शाब्दज्ञानत्वावच्छिन्नाभावस्य वर्णज्ञानत्वावच्छिन्नाभावस्य वा एकस्य प्रयोजकत्वे लाघवेन सामान्यकारण
तायाअपि सप्रमाणकत्वात् ॥ ईदृशलाघवानुरोधेन कारणत्वासिद्धौ स्मृतिस्वर्गादौ संस्कारादृष्टविशेषादीनां हेतुता विलयप्रसंगा
त्तादृशकारणसमवधानवतोऽपि पुंसः कदाचिदेव स्मृतिस्वर्गादिकार्यमुत्पद्यतइत्येतादृश नियमनिर्वाहाय अननुगतानामु
द्बोधकानां कालविशेषाणांच विशेषसामग्रीत्वकल्पनाया अवश्यकत्वात्तत्रैवोपपत्तेः ॥ अतएवच यद्विशेषयोः कार्यकारणभावो
बाधकं विना तत्सामान्ययोरपीति प्राचां प्रवादोऽपि सयुक्तिकः ॥ अथैवं पदज्ञानत्वेनैव शाब्दत्वावच्छिन्नहेतुताकल्पनमुचितं तु न
वर्णज्ञानत्वादिना । निरर्थकवर्णज्ञानदशायां वर्णज्ञानत्वावच्छिन्नाभावासत्त्वेन तत्कालीनशाब्दसामान्यानुत्पादे विशेषसामग्र्य
भावानां प्रयोजकत्वकल्पने गौरवात् ॥ नच वर्णानां निरर्थकत्वमेव न संभवति एकाक्षरकोशे प्रत्येकं सकलवर्णानामेव शक्ति
प्रतिपादनात् तथाच पदज्ञानाभावो वर्णज्ञानाभावनियत एवेति नोक्तगौरवावकाश इति वाच्यं ॥ वास्तवशक्तिमज्ज्ञानत्वादिरूपप
दज्ञानत्वावच्छिन्नाभावस्य वर्णज्ञानत्वावच्छिन्नाभावनियतत्वेऽपि शब्दशक्तिविषयकज्ञानत्वावच्छिन्नाभावस्य तथात्वाते

नरूपेणहेतुत्वेलाघवस्यानपायात्। लक्षणाज्ञानाधीनशाब्दबोधप्राक्कालेपि शक्तिज्ञानमावश्यकमेव सर्वलाक्षणिकस्थलेन्वय
बोधस्य प्राचीनैरनभ्युपगमात् विशिष्टवाक्यार्थघटकयत्किंचित्पदार्थे शक्तिज्ञानस्यावश्यापेक्षणीयत्वात् शक्यसंबंधात्मिकायाः
लक्षणायाः शक्तिघटितत्तया लक्षणाज्ञानत्वस्येव शक्तिज्ञानात्मकत्वाच्चेति न व्यभिचार इति चेदिष्यतएव निरुक्तपदज्ञानत्वेनैव
2 शाब्दबोधहेतुता निराकांक्षाद्घटः कर्मत्वमानयनं न कृतिरित्यादिवाक्यात् घटमानयेत्यादाविव कर्मत्वानयनकृत्यादिषु घटकर्म
धे त्वानयनादीनां आधेयत्वनिरूपकत्वविषयित्वादिसंबंधेनान्वयबोधानुत्पादादाकांक्षाज्ञानस्य शाब्दबोधहेतुता स्वीक्रियते तद्रू
पावच्छिन्नपदविषयकोपस्थितिव्यतिरेकप्रयुक्तप्रकृतान्वयबोधाभावप्रयोजकव्यतिरेकप्रतियोगिस्वावच्छिन्नपदविषयको
को पस्थितित्वे योधर्मस्तद्वत्वमेवतद्रूपावच्छिन्नपदनिरूपिताकांक्षा कर्मत्वादिविशेष्यकं धेयतादिसंसर्गकघटादिप्रकारकान्वयबो
धे अमादिपरे वघटपदादेर्निरूपितारा ताहृश्याकांक्षा ताहृशान्वयबोधे घटपदत्वाद्यवच्छिन्नविषयकोपस्थितेरमपदत्वावच्छिन्न ।२।
विषयकोपस्थितेर्मुपदत्वावच्छिन्न हेतुतया तदभावयोः प्रकृतान्वयबोधाभावेकारणाभावेनुद्वयाप्रयोजकत्वात्। प्रयोज्य

धे२

प

प्रयोजकभावेश्चकार्याभावकारणाभावयोः स्वरूपसंबंधविशेषः पदार्थांतरमेववा॥ नचतत्रमानाभावः॥ दंडाभावाद्घटाभाव
इत्यादिप्रतीतेरेवमानत्वात्॥ तत्रपंचम्यर्थस्यान्यस्यदुर्वचत्वात्। कर्मत्वादिपदोपस्थितेश्चतादृशान्वयबोधहेतुतायाअप्रामाणि
कत्वात्नतद्व्यतिरेकतादृशान्वयबोधाभावप्रयोजकइतिनकर्मत्वादिपदे घटादिपदस्यतादृशान्वयबोधोपयोगिनीआकां
तृः क्षा॥ अयमेतिपुत्रोराज्ञः पुरुषोपसार्यतामित्यादौपुरुषविशेष्यकराजसंबंधप्रकारकबोधतात्पर्यस्थलेतथाविधबोधोदयेन
तत्रराज्ञः पुरुषइत्यादौपदोपस्थितीनांहेतुतायाआवश्यकत्वात्तथाविधपदोपस्थितिव्यतिरेकाणांतादृशान्वयबोधाभाव
प्रयोजकत्वात्॥ यत्रपुत्रादिपदार्थान्वितस्वार्थप्रतीतिच्छयैवराज्ञइत्यादिकमुच्चरितंननुपुरुषादिपदार्थान्वितस्वार्थप्रतीति
च्छयातत्रतादृशपदयोःपरस्परसाकांक्षतावारणायद्वितीयपदेतद्रूपावच्छिन्नपदसमभिव्याहृतत्वमपिनिवेशनीयं॥ तत्पद
समभिव्याहारश्चतत्पदोपस्थापितार्थान्वितस्वार्थविषयकप्रतीतिजनकत्वप्रकारकेच्छाविषयत्वंप्रकृतान्वयबोधाभावेनत्का
लीनत्वंतत्पुरुषीयत्वंनिवेशनीयं। अतोनजनितान्वयबोधतादृशायामतिप्रसंगः॥ वस्तुतस्तुपरस्परसमभिव्याहृततद्रूपाव
च्छिन्नपदोपस्थितिव्यतिरेकप्रयुक्तप्रकृतान्वयबोधाभाववत्तत्पुरुषनिष्ठस्तदीयप्रकृतान्वयबोधेतद्रूपावच्छिन्नपदयोराकां

द

कांक्षा। इत्थंचतत्कालीनत्वाप्रवेशेपिनक्षतिः। अत्रेदंचिंत्यं। इयमाकांक्षाज्ञानस्वरूपसतीहेतुः। अयमेतिपुत्रोराज्ञःपुरुषोपसार्यतामित्या
दौसमभिव्याहारभ्रमेणापुरुषेराजसंबंधान्वयबोधानुपपत्तेः। समभिव्याहारघटितनिरुक्ताकांक्षायाज्ञानंहेतुः तथासतिकर्मत्वादि
३ पदज्ञानंघटपदज्ञानव्यतिरेकप्रयुक्तकर्मत्वादिविशेष्यकाधेयतासंसर्गकघटप्रकारकान्वयबोधाभावप्रयोजकव्यतिरेकप्रतियो
त्रि ४ गि इत्येतादृशोभिमानप्रघटपदज्ञानाभावात् कर्मपदज्ञानाभावाच्चतथाविधान्वयबोधाभावइत्येनादृशभ्रमाद्वाघटःकर्मत्वमित्यादौ
तथाविधान्वयबोधापत्तेः अथयत्वत्वयोरैक्याभावाद्विशिष्य[illegible]पदज्ञानत्वावच्छिन्नविशेष्यकघटपदज्ञानव्यतिरेकप्रयुक्ततथा
विधान्वयबोधा[illegible]भावप्रयोजकव्यतिरेकप्रतियोगित्वप्रकारकज्ञानत्वादिनातथाविधान्वयाबोधाभावविशेष्यकघट
पदज्ञानव्यतिरेकात्पदज्ञानव्यतिरेकप्रयुक्तत्वप्रकारकज्ञानत्वादिनावातथाविधान्वयबोधहेतुतावाच्या। तथाचकर्मत्वपदत्वा प्रम
दिप्रकारकज्ञानात्कदाचिदपितादृशान्वयबोधा[illegible]नकर्मत्वपदत्वाद्यवच्छिन्नविशेष्यकनिरुक्तव्यतिरेकप्रयुक्तप्रतियोगित्वप्र प्र
कारकज्ञानस्यप्रकृतान्वयबोधाभावविशेष्यककर्मत्वपदत्वावच्छिन्नविशेष्यक[illegible]व्यतिरेकप्रयुक्तत्वप्रकारकज्ञानस्य
वाहेतुतायाअकल्पनान्नोक्तभ्रमात्तथाविधान्वयाबोधापत्तिरितिचेत्तर्हितादृशान्वयबोधेलाघवाद्घटपदत्वादिप्रकारकज्ञान
पदे प्र ज्ञान २ त

त्वाद्युपदत्वप्रकारकज्ञानत्वादिनैव हेतुतास्तु। तत एव घटः कर्मत्वमित्यादौ दर्शितान्वयबोधवारणसंभवात्। किं निरुक्तगुरुशरीराकांक्षा
ज्ञानहेतुतया। न च कर्मत्वादिविशेष्यकाधेयत्वादिसंसर्गकघटादिप्रकारकबोधे घटपदज्ञानत्वाम्पदज्ञानत्वादिना विशिष्य कारण
ताकल्पनापेक्षया निरुक्ताकांक्षाज्ञानत्वेनैकहेतुताकल्पने लाघवमिति वाच्यं। तथाप्यमुपदविशेष्यकस्य घटपदाकांक्षादिप्र अ
कारकज्ञानस्य घटपदविशेष्यस्यामुपदाकांक्षाप्रकारकज्ञानस्य वा हेतुत्वे विनिगमनाविरहेण कारणताद्वयस्यावश्यकत्वात्
द्वितीयकल्पेपि घटपदज्ञानव्यतिरेकप्रयुक्तत्वप्रकारकत्वाम्पदज्ञानव्यतिरेकप्रयुक्तत्वप्रकारकत्वयोः कारणतावच्छेदकघट
कयोर्मिथो विशेष्यविशेषणभावे विनिगमनाविरहेण कारणताद्वैरवश्यकत्वात्। अथ कर्मत्वादिविशेष्यकाधेयत्वादिसंसर्ग
कघटादिप्रकारकबोधे अम्पदत्वप्रकारकज्ञानत्वेन हेतुत्वं कल्प्यमेव घटः कर्मत्वमित्यादौ तादृशान्वयबोधवारणसंभवेपि घट
मानयेत्यादौ अयमेति पुत्रो राज्ञः पुरुषोपसार्यतामित्यादौ च तत्तत्पदयोः समभिव्याहारस्य संशये व्यतिरेकनिश्चये वा तत्तत्पदार्थ
योरन्वयबोधानुदयात् समभिव्याहारघटितनिरुक्ताकांक्षाज्ञानहेतुत्वमावश्यकमिति चेत्तर्हि लाघवात्तत्तत्पदार्थान्वयबोधे त
त्तत्समभिव्याहारज्ञानत्वेनैव हेतुत्वकल्पनमुचितं। न चैवमन्वयानुभवे जातेपि पुनरन्वयबोधापत्तिः। अनुमितौ सिद्धेरिव शा

द्बुद्धेरन्वयानुभवस्यप्रतिबंधकत्वोपगमात्तु।नचान्वयानुभवाभावस्यसम।भिव्याहारज्ञानस्यचकारणताद्वयकल्पनापेक्षयैवनिरु
क्ताकांक्षाज्ञानस्यैवहेतुताकल्प[illegible]नमुचितमितिवाच्यं।निरुक्ताकांक्षाज्ञानस्यहेतुत्वेपिस्वरुपसतोऽन्वयाभावाभावस्यहेतुता
याअवश्यकत्वात्।अन्यथाअन्वयानुभवेजातेपिघटत्वादिनातदभावघटिताकांक्षाज्ञानसंभवेनशाब्दबोधापत्तितादवस्थ्यात्।नच
स्वविशेष्यकत्वसमभिव्याहृतत्तत्पदज्ञानव्यतिरेकप्रयुक्तान्वयानुभ वाभावत्वाज्ञानस्यैवहेतुत्वंवाच्यंतादृशंचज्ञानंअन्वयानुभव
कालेशब्दादितोपिनसंभवतिआत्मविशेषगुणस्यत्वेसतिस्वरूपसतरावप्रतियोगिनोविपरीतज्ञानविरोधित्वादितिवाच्यं।स्वत्वाननुगमेननतत्त
त्पुरुषीयान्वयबोधंतत्तत्पुरुषविशेष्यकनिरुक्तान्वयानुभवाभाववत्ताज्ञानत्वेनैवहेतुतायावक्तव्यतयाअनंतपुरुषभेदेनानं
तकारणताप्रसंगात्।अस्मन्मतेअन्वयानुभवाभावस्यात्मनिष्ठप्रत्यासत्त्याकारणत्वेनैवातिप्रसंगभंगात्।पुरुषभेदेननहेतु
ताभेदाभावात्।नचमयापितत्तत्पुरुषीयत्वमनंतर्भाव्यसमवायसंबंधेनान्वयबोधंप्रतिसमवायविशिष्टविशेष्यताप्रत्यास ४
त्यानिरुक्तान्वयानुभवाभावरुपाकांक्षाज्ञानस्यहेतुत्वंकल्पनीयमितिनातिप्रसंगोनवापुरुषभेदेनकारणताभेदइतिवा
च्यं।विशेष्यताविशिष्टसमवायस्यापिप्रत्यासत्तितामादायविनिगमनाविरहात्प्रसंगात्एवमन्वयानुभवाभावज्ञानस्यहे

तुल्येविनश्यदवस्थान्वयानुभावाभावज्ञानादन्वयबोधप्राक्क्षणोत्पन्नात् द्वितीयक्षणेऽन्वयबोधोत्पत्तेः सन्निवेशनेऽप्ये
तैव। नचविषयिताविशिष्टसामानाधिकरण्यसंबंधेन निरुक्तान्वयानुभवाभावविशिष्टज्ञानत्वेनैवाकांक्षाज्ञानस्य हे
ताकल्प्यते। अन्वयानुभवदशायां नेचेतादृशसंबंधेन अन्वयानुभवाभावविशिष्टं तज्ज्ञानमस्तीति नातिप्रसंग इतिवाच्यं
सामानाधिकरण्यविशिष्टविषयितासंबंधेनान्वयानुभवाभावविशिष्टत्वनिवेशमादाय विनिगमनाविरहप्रसंगा
त्। एवं यत्र घटमानेत्यानुपूर्वीविशेषावच्छिन्नपदज्ञानपदार्थोपस्थित्यादिकमन्वयानुभवाभावश्च स्वरूपसद्वि
घटेन तु पदज्ञानान्वयानुभवाभावयोर्ज्ञानं न वा पदज्ञानविरहान्वयानुभवाभावयोः प्रयोज्यप्रयोजकभावज्ञा
नं तत्रापि शाब्दबोधस्यानुभविकतया नो काकांक्षाज्ञानस्य शाब्दधीहेतुतासंभवः। यत्तु निरुक्ताकांक्षाज्ञानं साका
ङ्क्षत्वव्यवहारएवोपयुज्यते शाब्दबोधे तु तद्घटकसमभिव्याहारांशमात्रस्यज्ञानं स्वरूपसदन्वयानुभवाभावश्च हे
तुः नच समभिव्याहारज्ञानस्य हेतुतायां मानाभावः अयमेति पुत्रो राज्ञः पुरुषोपसार्यतां विघलं जलं नद्याः कच्छे

नह्विषश्चरतीत्यादौराजसंबंधपुरुषयोर्नद्दीसंबंधकक्छयोश्चान्वये वक्तुस्तात्पर्याभावात्तात्पर्यज्ञानस्योपकारणविरहेणैवतदन्वया
बोधानुत्पादोपपत्तेस्तात्पर्यभ्रमसत्वेचतथाविधान्वयबोधस्येष्टत्वात् इतिवाच्यं तात्पर्यज्ञानंहिराजपदंइतरान्वितराजपरं इत्याकारकं
5 सामान्यतएकपदार्थविशेषणत्वापरपदार्थमवगाहमानंशाब्दबोधेहेतुः नतुराजपदंपुरुषान्वितराजपरमित्याकारकंविशेषतःपदा
र्थद्वयविषयकं तथात्वेतिराजादिरूपैकैकार्थमंतर्भाव्यैवपुरुषादिरूपसहस्त्रार्थभेदेनराजपदधर्मिकतात्पर्यज्ञानस्यसहस्त्रकारण
ताकल्पनप्रसंगात्मन्मतेएकैकपदधर्मिकतात्पर्यज्ञानस्यएकैकस्वार्थमंतर्भाव्यैकैककारणताकल्पनेनैवोपपत्तेः एवंचमत्रराज्ञःपु
त्रेणैवपुरुषस्यापसारणेनैवान्वयबोधस्तत्रापि अवश्यकाभ्यांराजपदं इतरान्वितराजपरंपुरुषपदमितरान्वितपुरुषपरमित्याका
रकतात्पर्यज्ञानाभ्यांराजपुरुषयोरन्वयबोधप्रसंगोदुर्वारएवेतिराजपुरुषपदार्थयोरन्वयबोधेराजपदंपुरुषपदोपास्थापितार्था राम
न्वितस्वार्थप्रतीतिजनकत्वाभिप्रायविषयइत्याद्याकारकसमभिव्याहारज्ञानस्यहेतुत्वमावश्यकमेव नचैवंराजाद्येकैकपदधर्मिक ॥५॥
समभिव्याहारज्ञानस्यपुरुषाद्यपरसहस्त्रपदार्थमंतर्भाव्यसहस्त्रकारणतायाअर्थतात्पर्यज्ञानकारणत्वांतरस्यचकल्पनापेक्षया

सोऽयमस्माकं ब्राह्मणाय राजेति श्रुत्या नस्यापितत्वात्

र्थतात्पर्यज्ञानस्यैव विशेष्यपदार्थविषयकत्वमंतर्भाव्य कारणताकल्पनमुचितमिति वाच्यं यतो विशिष्यपदार्थद्वयविषयकत्वमंतर्भाव्यार्थ
तात्पर्यज्ञानस्य हेतुत्वोपगमे शक्त्या लक्षणया राजपदोपस्थापितनृपधर्मिकराद्यर्थसहस्रस्यैकैकमंतर्भाव्य पुरुषादिरूपसहस्रार्थभेदे
न कारणतासहस्रस्य कल्पनीयतया राजपदधर्मिकस्यैव तात्पर्यज्ञानस्य सहस्रगुणितसहस्रकारणताकल्पनमस्माकं तु राजपदस्य
स्वार्थसहस्रभेदेन तद्धर्मिकार्थतात्पर्यज्ञानस्य कारणतासहस्रं समभिव्याहारज्ञानहेतुतायां विशिष्यपदार्थानंतर्भावेन राजपदधर्मि
कस्य तस्य सहस्रापरपदभेदेन कारणतासहस्रकल्पनीयमिति स्फुटतरं लाघवमिति अथैवमपि अन्वयानुभवाभावरूपाकांक्षाघटक
भागस्य शाब्दबोधहेतुत्वं विचारासहं शाब्दत्वावच्छिन्नं प्रति शाब्दत्वेन तद्विषयकशाब्दत्वावच्छिन्नं प्रति तद्विषयकशाब्दत्वेन प्रतिबंधकत्वे
सैंधवमानयेत्यादौ लवणादिरूपैकार्थविषयकशाब्दबोधसत्वे आवृत्त्यापि घोटकादिरूपार्थांतरविषयकान्वयबोधानुपपत्तेः घटकर्म
त्वादिरूपावांतरवाक्यार्थबोधानंतरं घटकर्मकानयनादिरूपमहावाक्यार्थज्ञानानुदयप्रसंगाच्च न च पदानुसंधानव्यक्तीस्तत्तद्व्यक्ति
त्वेनोपादाय तत्तदनुसंधानजन्यशाब्दत्वेन प्रतिबंधकत्वान्न दोषः अवांतरवाक्यार्थबोधानंतरं पुनस्तत्पदानुसंधानं तरमभ्युपगम्यैव
महावाक्यार्थबोधोपगमादिति वाच्यं एवं सति जनितान्वयबोधकपदानुसंधानादनुसंधानांतरं विनैव शाब्दबोधसामान्यापत्तेः न

चविशेषसामग्रीसमवहितायाएवसामान्यसामग्र्याः फलजनकत्वात्तदनुसंधानजन्यशाब्दबोधाभावरूपविशेषसामग्रीविरहान्नोक्तापत्तिः
अथवा तत्तदर्थविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति सामान्यतस्तत्तदर्थविषयकशाब्दबोधत्वेनैव प्रतिबंधकता अनुसंधानांतरव्यक्तीना
मुत्तेजकत्वोपगमात्तन्महावाक्यार्थबोधादेः खंडवाक्यार्थबोधानंतरमनुपपत्तेः उदीच्यानसंधानव्यक्तीनां स्वजन्यबोधप्रागभाववि
शिष्टत्वेनैवोत्तेजकता वाच्या अतो न तादृशानुसंधानजन्यबोधानंतरं तादृशानुसंधानव्यक्तितः अनुसंधानांतरं विनैवान्वयबोधप्रसंग
इति वाच्यम् गौरवात् अयमेति पुत्रो राज्ञः पुरुषोपसार्यतामित्यादौ राजपुत्रान्वयबोधोत्पत्तिक्षणे ईश्वरराजपुरुषान्वयबोधोत्पादकप्र
योजकतात्पर्यज्ञानाभावात्तथाविधसमभिव्याहारज्ञानाभावादेव वा तदुत्तरमपि तादृशान्वयबोधानुत्पादसंभवादन्वयबोधं प्रति अन्वय
बोधस्य प्रतिबंधकत्वे मानाभावात् न च समानाकारधारावाहिकशब्दबोधावत्तिवारणायान्वयानुभवाभावस्य हेतुत्वमावश्यक
इति वाच्यं प्रथमशाब्दबोधक्षणे तत्त्द्वितीयक्षणे वा तज्जनकपदज्ञानजन्यपदार्थोपस्थित्यादीनां विनाशात्तादृशकारणविरहेणैवावि
रलक्रमोत्पन्नशाब्दबोधधारायाआपत्त्यसंभवात् अंतरा पदज्ञानतज्जन्यपदार्थोपस्थित्युत्पादस्थले पूर्वान्वयबोधस्य तादृशपदार्थो ६
पस्थितिकाले विनाशात्तदुत्तरमन्वयबोधांतरस्य भवतोप्यावश्यकत्वात् यत्र प्रथमशाब्दबोधजनकपदार्थोपस्थितिरेवाकांक्षायो

ग्यतासत्तितात्पर्यविषयिणीतत्रविनश्यदवस्थतादृशसमूहालंबनपदार्थोपस्थितितस्तादृशबोधाद्द्वितीयक्षणेपुनस्तादृशबो
धस्त्विष्यतएवेतिचेन्न अन्वयानुभवस्याप्रतिबंधकत्वेउक्तस्थलेउत्पन्नायाएवशाब्दबोधव्यक्तेरनंतरक्षणेपुनरुत्पादवारणाय
तत्रतत्तेव्यक्तिप्रागभावस्यहेतुतानांअनंतानांकल्पनाप्रसंगात् मन्मतेसामान्यसामग्रीविरहादेवतादृशापत्तिवारणासंभवा
त् अन्वयानुभवस्यप्रतिबंधकत्वमावश्यकं नचतच्छाब्दबोधव्यक्तौतज्जनकपदार्थोपस्थितिजनकपदज्ञानव्यक्तेस्तत्वेनहेतु
त्वंतत्समान विषयकशाब्दबोधोत्पत्त्यधिकरणकालांतरेतद्व्यक्तेरुत्पादवारणायोभयमतएवकल्पनीयं तथाचतादृशपद
ज्ञानव्यक्तेः प्रथमशाब्दबोधोत्पत्तिकालएवविनाशान्नतद्द्वितीयक्षणेतद्व्यक्त्यापादनसंभवइतिवाच्यं पदज्ञानस्यपदजन्यपदा
र्थोपस्थितिद्वारैवहेतुतयातन्नाशेपितज्जन्यपदार्थोपस्थितिसत्वेनापत्तिसंभवात् कर्मत्वत्वाद्यवच्छिन्नविशेष्यकघटत्वाद्य मुख्य
वच्छिन्नप्रकारकशाब्दबोधस्यकर्मत्वाद्यवच्छिन्नविशेष्यकघटत्वाद्यवच्छिन्नप्रकारकशाब्दत्वमेवप्रतिबध्यतावच्छेदकंवाच्यं अ
तोघटकर्मत्वादिरूपखंडवाक्यार्थबोधानंतरंघटकर्मकानयनादिरूपमहावाक्यार्थबोधस्य नानुपपत्तिः एवंघटत्वाद्यवच्छि
न्नविशेष्यकनीलादिप्रकारकबोधस्यघटत्वावच्छिन्नमुख्यविशेष्यतानिरूपितधर्मितावच्छेदकतान्यनीलादिप्रकारताशालिशाब्दत्वं

त्वं 

अतो घटो नील इत्याद्यवान्तरवाक्यार्थज्ञानपूर्वकं नीलो घटः सुंदरः नीलघटमानयइत्यादिवाक्यजन्यमहावाक्यार्थबोधस्यनानुपपत्ति
रेवमन्यत्राप्यूह्यमिति अत्र च बोधद्वयतात्पर्यज्ञानस्यैकैकमिकान्वयबोधद्वयोत्पादात् तादृशज्ञानस्योत्तेजकत्वं स्वीकरणीयं तत्र
प्राथमिकव्यक्तेर्द्वितीयक्षणे उत्पादवारणायागत्या प्रकारान्तरमास्थेयमिति तदप्यसत् तथा हि राजपदं पुरुषान्वितराजपरं इत्या
कारकस्य विशेषतः पदार्थद्वयविषयकस्यैव तात्पर्यज्ञानस्य शाब्दबोधहेतुत्वमावश्यकं समान्यत इतरपदार्थविषयकस्य तस्य
हेतुत्वे यत्र लक्षणया पुरुषपदोपस्थापितेनार्थान्तरेण राज्ञोऽन्वयबोधे राजपदोपस्थापितार्थान्तरे पुरुषस्यान्वयबोधे वा वक्तुस्ता
त्पर्यं न तु राजपुरुषयोरन्वयबोधे तत्र राजपदं पुरुषपदोपस्थाप्यार्थान्वितस्वार्थप्रतीतिप्रतीतिजनकत्वाभिप्रायविषय इत्येता
दृशसमभिव्याहारज्ञानस्य राजपदं इतरान्वितराजपरं पुरुषपदं इतरान्वितपुरुषपरमित्याकारकार्थतात्पर्यज्ञानयोश्च राज्ञः पु
रुषपदोपस्थाप्यार्थान्तरस्य पुरुषेण राजपदोपस्थाप्यार्थान्तरस्यान्वयबोधानुरोधेनावश्यकतया तद्बलाद्राजपुरुषयोरन्वय
बोधप्रसंगात् तथा चैकवाक्यताभिप्रायविषयत्वरूपसमभिव्याहारज्ञानस्य हेतुत्वे मानाभावः उक्तस्थले तथाविधतात्पर्यज्ञा श म १७॥
नविरहादेवातिप्रसंगविरहात् न च यत्र राजपदं पुरुषान्वितराजपरं इत्येतादृशतात्पर्यग्रहो वर्त्तते। अपि च राजपदं पुरुषपद

सहकारेणायत्तत्पदार्थान्वितस्वार्थबोधकत्वंतदभिप्रायविषयोनवेत्याकारकसमभिव्याहारसंशयस्तद्व्यतिरेकनिश्चयोवावर्त्ततेतत्रराज
पुरुषपदाभ्यांराजपुरुषार्थबोधापत्तिवारणायत्तादृशपदद्वयजन्यशाब्दबोधे।तादृशाभिप्रायविषयत्वज्ञानहेतुत्वमावश्यकमितिवा
च्यं।उक्ततात्पर्यज्ञानसत्वेतथाविधसंशयादिसत्वेपितादृशशाब्दबोधस्येष्टत्वात्।अस्तुवाराजपदंपुरुषपदसहकारेणायत्पुरुषान्वि
तराजबोधकत्वंतदभिप्रायविषयइत्याकारकमेवार्थतात्पर्यज्ञानंहेतुस्तावतैवोक्तातिप्रसंगवारणासंभवात्।एवमन्वयानुभवाभा
वहेतुत्वेपिमानाभावः।उक्तस्थलेशाब्दबोधोत्पत्तिद्वितीयक्षणेतद्व्यक्तेः।पुनरुत्पादस्यापादकविरहात्।यतः।सामग्र्यव्यवहितोत्तर
क्षणस्यकार्याधिकरणत्वव्याप्यत्वेनैवोपगम्यतेनतुकार्योत्पादव्याप्यतापीतिस्वोत्पत्तिद्वितीयक्षणस्यस्वाधिकरणत्वंपुनरिष्टमे
वतृतीयक्षणेचनतदधिकरणत्वस्याप्यापत्तिसंभवः।द्वितीयक्षणेतद्व्यक्तिंप्रतितद्व्यक्तित्वेनावश्यकल्पनीयहेतुताकतत्तत्पदा
र्थोपस्थितिव्यक्तीनामभावादिति।अत्रनव्याः।।प्रकृतिप्रत्ययादीनामानुपूर्वीविशेषणवाकांक्षातत्रप्रत्ययनिष्ठान्यपदत्वति
प्यदत्वादिरूपानुपूर्वीविशेषावच्छिन्ननिष्ठप्रकृतितानिष्ठघटपदत्वनीपदत्वरूपानुपूर्वीविशेषावच्छिन्नाव्यवहितोत्तरत्वरूपानुपूर्वी

नामार्थधात्वर्थयो र्भेदान्वयबोधोपयोग्याकांक्षा अतोघटकर्मत्वमानयनं कृतिरित्यादौ कर्मत्वादिपदस्य भेदान्वयबोधेनघटादि
पदसाकांक्षता। अव्यवधानप्रवेशात्घटस्यरूपंपश्येत्यादौ रूपादिपदोत्तराम्पदादेर्नटादिपदसाकांक्षताप्रसंगः नचैवंसतिघट
4 रूपंपश्येत्यादिद्वंद्वसमासस्थलेअमादिपदस्यरूपादिपदव्यवहिततयाघटादिपदसाकांक्षत्वानुपपत्त्याकर्मत्वादौघटाद्यन्वयानु
पपत्तिरितिवाच्यं-अन्यदत्वावच्छिन्ननिष्ठस्यघटादिपदाव्यवहितोत्तररूपादिपदाव्यवहितोत्तरत्वस्याप्याकांक्षात्वात्ताहृशनाना
विधाकांक्षाज्ञानानांएकैकविधान्वयबोधंप्रतिहेतुत्वेमिथोव्यभिचारस्याप्रवारणीयत्वात्-यत्तु घटादिपदोत्तरप्रत्ययानुत्तरत्वरूपम
तथासतिप्रत्ययत्वाद्यनुपस्थितिदशायांताहृशाव्यवधानस्याग्रहीतयाशाब्दबोधानुपपत्तेः यावत्प्रत्ययसाधारणस्यप्रत्ययत्वस्य
दुर्वचत्वात्तत्पुरुषस्थलेपित्वाच्च अथद्वंद्वस्थलेनुरोधेनघटपदाव्यवहितोत्तररूपादिपदाव्यवहितोत्तरत्वस्यामादिपदनिष्ठस्यक ८
र्मत्वादौघटान्वयबोधौपयिकाकांक्षात्वोपगमेघटस्यरूपंपटरूपमित्यादितत्पुरुषस्थलेपिकर्मत्वादौघटाद्यन्वयबोधप्रसंगइति
चेन्न तत्पुरुषस्थलेपूर्वपदस्यविभक्त्यंतार्थविशिष्टपरतयोक्तस्थलेघटपदस्यघटपरत्वाभावेनकर्मत्वेघटान्वयापत्तिविरहा न
व्यवधानमेवाकांक्षाघटकंवाच्यं घटरूपंपश्येत्यादावपिताहृशविशिष्टाभावात्मकमव्यवधानमक्षतमेवेति तदसत् ५

नचघटपदार्थस्यघटसंबंधित्वावच्छिन्नस्यैवकर्मत्वान्वयबोधप्रसंगः अभेदेनघटसंबंधित्वावच्छिन्नान्वितरूपत्वावच्छिन्नस्यैवतत्र
कर्मत्वान्वयितयाइष्टापत्त्यसंभवादितिवाच्यं तत्पुरुषस्थलेतादृशान्वयबोधेतात्पर्यविरहेणैतदापत्त्यसंभवात् यत्ररूपांशेकर्मत्वांशे
चघटपदार्थस्यविशेषणतयाऽन्वयबोधेतात्पर्येणैवघटरूपंपश्यत्याद्युच्चरितंतत्रतादृशतात्पर्यज्ञानवतांद्विविधबोधएवेष्यते अ
न्यथापुनरगत्याघटरूपमित्याद्यानुपूर्वीज्ञानजन्यकर्मत्वादिविशेष्यकघटादिसंबंधिप्रकारकान्वयबोधेघटादिपदधर्मिकस्यकर्मत्वे वि
तरविशेषणतयास्वार्थान्वयबोधपरत्वग्रहस्यप्रतिबंधकत्वंवाच्यं अथवाघटपदंविशेषणतयाकर्मत्वान्वितस्वार्थपरमित्येता
दृशतात्पर्यग्रहहेतुतायांधर्मिणिविशेषणतयाकर्मत्वेतरान्वितस्वार्थपरतयाऽगृह्यमाणत्वंविशेषणांदेयंकिंवाविशेष्यतासंबंधाव
च्छिन्नतादृशस्वार्थपरत्वग्रहाभावस्यस्वाश्रयविशेष्यकतासंबंधेनवैशिष्ट्यंतादृशतात्पर्यग्रहएवनिवेशनीयंपूर्वोक्तप्रकारद्वयेऽस्व
रसंप्रकाशयन्तिद्वंद्वार्थतत्पुरुषार्थपरतादृशवाक्यद्वयज्ञानवतःपुंसउभयतात्पर्यज्ञानाद्युगपदुभयबोधोपपत्तिः नचतात्पर्यज्ञाने
तद्विशेष्यपदेवानिरुक्तविशेषणेनविशेषितेघटमित्येतादृशानुपूर्वीघटकघटपदेयत्रविशेषणतयाकर्मत्वत द्वितरान्वितस्वार्थप
रताग्रहस्तत्रकर्मत्वविशेष्यकघटान्वयबोधानुपपत्तिरितिवाच्यं तत्रतादृशबोधस्यानुभविकत्वेनघाविशेषणमनंतभविष्यतात्पर्यज्ञा

अतएव२

नहेतुत्वांतरस्यकल्पनीयत्वात् तादृशकारणतावच्छेदकावच्छिन्नस्यचघटमित्याद्यानुपूर्वीज्ञानरूपसहकारिसमवहितस्यैवफलोप
धायकत्वोपगमात्ननतद्भूतानुद्भूटरूपंपश्येत्यादावतिप्रसंगः उत्तरत्वनिवेशाद्रूपंघटस्यपश्येत्यादावमादिपदस्यकर्मत्वादिविशेष्यक
घटाद्यन्वयबोधेनसाकांक्षतारोकघटपदाव्यवधानस्यान्यघटपदोत्तरत्वस्यचज्ञानात्तथाविधशाब्दबोधापत्तिवारणायविशेष्यत
त्वपदाव्यवहितत्वेसतितत्पदोत्तरत्वस्यैवज्ञानंशाब्दबोधजनकत्वंवाच्यं वस्तुतः स्वाव्यवहितत्वविशिष्टोत्तरत्वसंबंधेनघटादिपद
१ वत्वमेवाकांक्षाद्रिघटकंरूपंघटस्येत्यादावमादिपदस्यतादृशसंबंधेननघटपदवत्वं अन्यदीयाव्यवधानस्यान्यदीयोत्तरत्वस्यचा
न्यदीयसंबंधत्वाभावात्तादृशविशिष्टसंबंधेनकस्यचिदपिघटादिपदस्यतत्रासत्वादतः पदव्यक्तिभेदेनकार्यकारणभावभेदेवि
रहेपिनातिप्रसंगः अथयादृशनामपदाद्यनंतरंयादृशप्रत्ययपदंकदाचिदपिकेनचिल्लो[illegible]रितंअथचतादृशनामपदंलिखिला खं
केनचिन्मौनिनातादृशप्रत्ययपदमव्यधानेनलिखितंतादृशलिप्यनुमिततथाविधपदयोरव्यधानघटताकांक्षाविरहात्तत राम
दनुसंधानादन्वयबोधानुपपत्तिरितिचेन्न· तत्रव्यवहितोच्चरितयोस्तथाविधपदयोरव्यवधानघटिताकांक्षाभ्रमादेवशाब्द ॥ १८
बोधोपगमात् पश्चाल्लेखकाभिप्रायविषयतथाविधपदयोर्व्यवधानमेवप्रतिसंधत्तेसतावदयंलेखकः एतत्पदार्थान्विर्मे

नैतस्यदार्थज्ञानवान्नरातस्तदव्यंजकाव्यवहितैतत्पदव्यंजकलिपिकर्तृत्वादित्यादिक्रमेणवाक्यार्थमनुमिनोत्येवनतुशाब्दयति। अस्तुवातत्प
दज्ञानानंतरमेतत्पदज्ञानं भवत्वित्याकारकाभिप्रायविषयत्वरूपैवानुपूर्व्येवाकांक्षा· इत्थंचशब्दस्यनित्यत्वंजानतोमीमांसकस्यशब्दे
व्यवहितोत्तरत्वज्ञानासंभवेपिनतस्यशाब्दबोधानुपपत्तिः प्रत्ययनिष्ठप्रकृत्यव्यवहितोत्तरत्वमिवप्रकृतिनिष्ठप्रत्ययाव्यवहितपूर्वत्व
मपिविनिगमनाविरहेणाकांक्षात्वज्ञानयोश्चवैकल्पिकंहेतुत्वं· प्रत्येकज्ञानादपिशाब्दबोधस्यानुभाविकत्वात्· समुच्चितस्यैवो
भयविधाकांकांक्षाज्ञानस्यफलोपधायकत्वेसामग्रीप्रतिबंधकतायांउभयज्ञानस्यैवनिवेशनीयतापत्त्याविशेष्यविशेषणभावेवि
निगमनाविरहेणप्रतिबंधकतावाहुल्यापत्तेः परस्परजन्यबोधेपरस्परव्यभिचारवारणप्रकारश्चाग्रेदर्शयिष्यते· अन्यथानाद्यंशेघ
टकर्मत्वान्वयबोधेचानयेत्यादिपदस्यघटमित्यादिपदोत्तरत्वंतादृशपदपूर्वत्वंचाकांक्षाघटमानयानयघटमित्येतादृशद्विविधानुपू
र्वीज्ञानादेवघटकर्मकानयनबोधात्· नचावांतरबोधजनकाभ्यांघटमित्येतादृशआनयेत्येतादृशानुपूर्वीज्ञानाभ्यांघटकर्मकानयन
रूपविशिष्टवाक्यार्थतात्पर्यज्ञानसहकृताभ्यामेवविशिष्टवाक्यार्थोपपत्तेस्तत्रघटमानयेत्याद्यानुपूर्वीज्ञानस्यहेतुत्वमप्रामाणि
कमितिवाच्यं· आनयघटमित्याद्यानुपूर्वीज्ञानात्घटमानयेत्यत्रघटकर्मतादृशकालेप्ययकानयनविधेयकबोधस्यवारणायतादृश

५

वोधंप्रतिआनयपदेघटमितिपदोत्तरत्वज्ञानस्यघटमितिपरेवानयपदपूर्वत्वज्ञानस्यएवंघटमानयेत्येतादृशानुपूर्वी [illegible]दे
ज्ञानात् आनयघटमित्यत्रैवानयनोद्देश्यकघटकर्मताविधेयकबोधवारणायतादृशान्वयवोधंप्रतिघटमितिपदेआनयपदोत्तरत्व
ज्ञानस्यानयपदेवाघटमितिपूर्वत्वज्ञानस्यहेतुतायाआवश्यकत्वात्शाब्दवोधेप्राङ्निर्दिष्टस्यैवोद्देश्यतयाचरमनिर्दिष्टपदार्थस्यै
10 वचविधेयतयातत्रतत्रतथाविधोत्यादेइष्टापत्त्यसंभवात् अतएवन्यक्कारोद्ध्ययमेवेत्यादौविधेयपरस्यन्यक्कारादिपदस्यायमित्या
दिपदोत्तरत्वाभावादभिमतोद्देश्यविधेयभावेनशाब्दवोधस्यानुपपत्तेरालंकारिकाविधेयाविमर्षदोषमुदाहरंति एवमाख्यातांतेोप
स्थाप्यप्राकत्वाादिप्रकारकबोधेप्रथमांतनामपदनिष्ठानुपूर्वीविशेषावछिन्नाख्यातांतधातुनिष्ठानुपूर्वीविशेषावछिन्नयोर
व्यवधानघ[illegible]पौर्वापर्यमाकांक्षा अतएवसत्यपितात्पर्यविशेषादिज्ञानेकाष्ठेनतंडुलंपरतीत्यादौकाष्ठतंडुलाद्यंशेकभावनान्वयः
अपितु प्रथमांतपदोपस्थाप्यांशएव एवमाख्यातोपस्थाप्यसंख्याप्रकारकबोधेपितादृशाकांक्षैवनियामिका अतएवभावनान्वय
स्थलएवसंख्यान्वयः एवंतत्तन्नामार्थयोरन्वयवोधेसमानविभक्तिकत्वनामयदयोरानुपूर्वीविशेषएवाकांक्षा अयंघटइत्यादाविवा १०
स्यघटइत्यादाविदंपदघटादिपदार्थयोरभेदान्वयबोधानुदयात् धान्येनधनवानित्यादौचाभेदसंबंधेनधान्यस्यधनादौनसाक्षा

दन्वयः अपितु तत्र तृतीयार्थाभेदे धान्यादिस्तादृशानेदस्य धनाद्यन्वयः कर्मधारयानुरोधेनोत्तरविभक्तिरहितयोर्नाम्नोरव्यवधा
नघटितानुपूर्व्या आकांक्षात्वं स्वीकरणीयं एवं सर्वत्र यादृशयादृशानुपूर्वीज्ञानादेव यादृशयादृशवाक्यार्थबोधस्तत्र तादृशानु
पूर्वीविशेषस्यैवाकांक्षात्वमूहनीयं अथ कर्मत्वादिविशेष्यकघटादिप्रकारकशाब्दबोधे अमपदत्वावच्छिन्नविशेष्यकघटपदाव्यव
हितोत्तरज्ञा[illegible]नहेतुता न संभवति घटावानय घटस्यानयनं कुंभमानय कुंभस्यानयनं कुंभमानयेत्वाद्यानुपूर्वी ज्ञानजन्यशा
ब्दबोधे व्यभिचारात् न च कर्मत्वोपस्थापकविभक्तिविशेष्यकघटोपस्थापकपदाव्यवहितोत्तरत्वज्ञानत्वेन दर्शितसकलानुपू
र्वीज्ञानसाधारणेन हेतुत्वान्न व्यभिचार इति वाच्यं घटीयकर्मत्वपरतदादिपदघटिततदस्तीत्यादिवाक्यजन्यकर्मत्वविशेष्यक
घटप्रकारकज्ञाने व्यभिचारस्यैतावताप्यनुद्धारात् घटोद्देश्यककर्मताविधेयकशाब्दत्वं निरुक्ताकांक्षाज्ञानजन्यतावच्छेदकवाच्यं
तदादिपदोपस्थापितघटविशेषितकर्मत्वबोधस्तु घटांशेन कर्मत्वविधेयकः पूर्वानुपस्थितपदार्थस्यैव विधेयतयैकपदोपस्थाप्य
योरुद्देश्यविधेयभावविरहादिति नायं व्यभिचार इति चेदस्त्वेवं तथाप्युक्तानुगतरूपेण हेतुत्वं न संभवति तथा सति यत्र घटः कर्मत्व

मित्यादौ कर्मत्वादिपदस्यैव घटादिपदाव्यवहितोत्तराम्पदत्वेन ज्ञानं तत्र कर्मत्वादावाधेयतासंबंधेन घटादिप्रकारकबोधानुपपत्तेः यत्र वा
घटमित्यादौ अमादिपदे कर्मत्वादिपदत्वभ्रमस्तत्र तेन रूपेण घटादिपदाव्यवहितोत्तरत्वज्ञानादपि तादृशान्वयबोधापत्तेः न च वास्तववि
भक्तिविशेष्यकज्ञानत्वेन हेतुत्वोपगमे एवं दर्शितदोषद्वयप्रसक्तिः न तु विभक्तित्वावच्छिन्नविशेष्यताकज्ञानत्वे न हेतुत्वोपगमे कर्मत्वपदस्या
म्पदत्वभ्रमदशायां विभक्तित्वेन तत्र घटपदाव्यवहितोत्तरत्वज्ञानसंभवात् तादृशबोधोपपत्तेः अम्पदे कर्मत्वभ्रमदशायां विभक्तित्वेन त
11 ज्ञानासंभवेन तादृशशाब्दबोधापत्त्यसंभवाच्चेति वाच्यं विभक्तित्वाद्यनुपस्थितिदशायामपि अम्पदत्वादिप्रकारकज्ञानाच्छाब्दबो
धोदयात् अमादिपदस्य विभक्तित्वाग्रहदशायामपि अम्पदत्वादिरूपानुपूर्वीविशेषपुरस्कारेण ज्ञानं विना तथाविधशाब्दबोधानुदया राम २२
च्च नानाविधानुपूर्वीज्ञानजन्यतावच्छेदकजातीनां समूहालंबनानुपूर्वीविषयकज्ञानजन्यशाब्दबोधे संकरप्रसंगेन व्यभिचारवारणा
यानुपूर्वीज्ञानजन्यतावच्छेदकतया जातिकल्पनमप्यशक्यमिति मैवं तत्तल्लिंगपरामर्शजन्यतावच्छेदककोटौ स्वसामानाधिकरण्या
वच्छिन्नस्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वसंबंधेन तत्तद्वैशिष्ट्यनिवेशपवारणवदत्रापि तादृशसंबंधेन तत्तदानुपूर्वीज्ञानवैशिष्ट्यं त

ज्जन्यतावच्छेदककोटौनिवेश्यव्यभिचारस्यवारणीयत्वात् अथकर्मत्वादिविशेष्यकाधेयत्वादिसंसर्गकघटादिप्रकारकशाब्दबोधे
घटमित्याद्यानुपूर्वीज्ञानस्येवघटःकर्मत्वमित्याद्यानुपूर्वीज्ञानस्यापिहेतुत्वंवक्तव्यंघटःकर्मत्वमानयनंकृतिरित्यादिप्रयोजकवाक्यं
श्रुत्वाघटमानयेतिवाक्यंस्मरतःप्रयोज्यवृद्धस्यघटकर्मकानयनप्रवृत्तिमुपलभ्यघटःकर्मत्वमित्यादिवाक्येव्युत्पन्नस्यपुंसस्तादृश एवं
वाक्यज्ञानादपिघटकर्मकानयनादिबोधात् तथाचतादृशवाक्यादृतथाविधस्यापिपुंसस्तथाविधशाब्दबोधापत्तिर्दुर्वारैवेतिचेन्न
विपरीतव्युत्पन्नस्यपुंसस्तादृशवाक्याधीनपदार्थोपस्थितिमूलकमानसवाक्यार्थबोधस्यैवोपगमात् यदिचतादृशवाक्याधी
नविपरीतव्युत्पन्नपुरुषीयवाक्यार्थबोधेशाब्दत्वमनुभवसिद्धं अन्यथाघटमानयेत्यादिवाक्याधीनघटकर्मकानयनादिबोधे
पिमानसत्वोपगमसंभवेनशब्दप्रामाण्यविलयापत्तेरितिविभाव्यतेतदास्तुतादृशानुपूर्वीज्ञानस्यापितथाविधशाब्दधी
हेतुतातथाविधानुपूर्व्यवच्छिन्नधर्मिकतादृशवाक्यार्थबोधस्वरूपयोग्यत्वग्रहरूपव्युत्पत्तेरपितत्सहकारित्वमुपगम्यदर्शि
तातिप्रसंगोवारणीयःएवंतादृशवाक्यएवव्युत्पन्नस्यपुंसोघटमानयेत्यादिवाक्यात्तादृशबोधस्यतुल्ययुक्त्यानुत्पादेनघंमि

न्तत्पदजन्यतत्पदार्थोपस्थितेः घटकं थकू कारणत्वकल्पनापेक्ष मालाघवात् तादृशानुपूर्वीसंस्कारकज्ञानजन्य

त्याद्यानुपूर्वीज्ञानेऽपि व्युत्पत्तिविशेषसहकारित्वमुपगंतव्यं अथ घटकर्मत्वादावगृहीतघटामादिपदशक्तिकस्यापि पुंसो घटमि

त्याद्यानुपूर्वीज्ञानदशायां कुंभः कर्मत्वमित्यादि निराकांक्षवाक्यघटकपदज्ञानाधीनपदार्थोपस्थितिमत्वे घटकर्मत्वाद्योर्भेदान्व

यबोधवारणाय तादृशान्वयबोधे घटपदज्ञानजन्यघटोपस्थितित्वाम्यदज्ञानजन्यकर्मत्वोपस्थितित्वादिना हेतुत्वमवश्यमेव स्वी

१२ करणीयं तथा च तादृशानुपूर्वीज्ञानस्य तादृशानुपूर्वीघटकतत्तत्पदज्ञानजन्यं तत्तत्पदार्थोपस्थितेः घटकत्वं ... कल्पना

... नुपूर्वीप्रकारकज्ञानजन्य तत्तत्पदार्थोपस्थितित्वादिनाऽऽकांक्षैकहेतुताकल्पनमुचितमिति शाब्दबोधेना

तु४ कांक्षाज्ञानं हेतुः अपि तु हेतुतावच्छेदकं नच विनिगमनाविरहादानुपूर्वीविशेषज्ञानजन्यतत्तत्पदार्थोपस्थितित्वेन तत्तत्पदार्थोपस्थितेः

कानुपूर्वीज्ञानत्वेन च हेतुत्वं निष्प्रत्यूहमेवेति वाच्यं तत्तत्पदार्थोपस्थापकानुपूर्वीज्ञानत्वेन हेतुत्वोपगमे आनुपूर्वीज्ञानजन्य

पदार्थोपस्थित्युत्पादक्षणे ... रावशाब्दबोधापत्तिः आनुपूर्वीज्ञानरूपकारणस्य प्राक्सत्वात् न च कारणतावच्छेदकविशिष्टकारणस्य १२

प्राक्सत्तायाः कार्योत्पादप्रयोजकतया पदार्थोपस्थितिप्राक्क्षणे अनुपूर्वीज्ञानसत्वेऽपि तदुपधायकतासंबंधेन पदार्थोपस्थिति

विशिष्टस्यतस्यासत्वान्नातिप्रसंगइतिवाच्यं विशिष्टसत्तायाः कार्योत्पादप्रयोजकत्वोपगमेविशेष्यसत्तायाइवविशेषणसत्ताया
अपितथात्वकल्पनाधिक्येनगौरवात् वस्तुतस्तु पदार्थोपस्थापकानुपूर्वीज्ञानत्वेनशाब्दबोधहेतुत्वस्यपदार्थोपस्थितिपूर्ववृत्ति
त्वमगृहीत्वाग्रहीतुमशक्यत्वेनतादृशधर्मस्यान्यथासिद्धिनिरूपकत्वं अन्यकार्यंप्रतिपूर्ववृत्तित्वंगृहीत्वैव यद्धर्मावच्छिन्नस्यप्रकृ
तकार्यपूर्ववृत्तिताग्रहस्तद्धर्मावच्छिन्नस्यान्यथासिद्धत्वात् अतएवपरामर्शजनकत्वेनव्याप्तिज्ञानस्यचम्यादिजनकतयेनचदंड
स्यघटहेतुत्वंप्रत्याख्यातंदीधितिकारेण तथाचनोपदर्शितविनिगमनाविरहावकाशः एतेनविशिष्टस्यप्राक्सत्वंयदिपूर्वका
लेविशेष्यविशेषणोभयसत्तारूपंस्यात्तदैवोक्तक्रमेणविशिष्टस्यप्राक्सत्तायांकार्योत्पत्तिप्रयोजकत्वोपगमेगौरवंतदेवनअ
पितुविशेषणवैशिष्ट्यावच्छिन्ननिरूपितविलक्षणाधिकरणत्वमेववविशिष्टसत्वं नचविशेष्यविशेषणोभयाधिकरणत्वनियत
९२ मात्रंतस्यकार्योत्पादप्रयोजकत्वेचनकिंचिदपिगौरवमितिदुर्वारैवविनिगमनाविरहइतिपरास्तं नचपदत्वानुपूर्वीविशेषाव
च्छिन्नपदज्ञानजन्यपदार्थोपस्थितिर्वर्त्ततेतादृशपदज्ञानंचविनष्टं तत्रशाब्दबोधापत्तिवारणायानुपूर्वीविशेषप्रकारकज्ञान
स्यापिशाब्दधीहेतुत्वमावश्यकमितिवाच्यं तत्रशाब्दबुद्धेरिष्टत्वात् अस्तुवाकारणतावच्छेदकविशिष्टप्राक्सत्वमेवकार्यो

प्रधाने तन्त्रे यत्तु आनुपूर्वीविशेषावच्छिन्नपदज्ञानजन्यपदार्थोपस्थितित्वापेक्षया लाघवात्पदार्थोपस्थितिद्वारा तादृशपदज्ञान
त्वेनैव हेतुत्वकल्पनमुचितं आनुपूर्वीविशेषघटकपदेष्वव्युत्पन्नस्य पुंसो निराकांक्षापदज्ञानजन्यपदार्थोपस्थितिसत्त्वेपि न शा
ब्दबोधापत्तिः साकांक्षपदज्ञानस्य व्यापारविरहात् व्यापारसत्त्वे कांक्षाज्ञाननाशेपि कार्योत्पत्तिरिष्टैव नन्वपदार्थोपस्थितेर्व्या
13 पारतानिर्वाहाय तस्या अपि स्वातन्त्र्येण हेतुताया अवश्यकल्पनीयत्वात् तदपेक्षया तथाविधगुरुधर्मपुरस्कारेण साकांक्षपद
जन्यपदार्थोपस्थितेरेकहेतुताकल्पनमेव वाच्यं घटकर्मत्वान्वयबोधे घटं कुम्भमित्याद्यानुपूर्वीप्रकारकज्ञानजन्यघटोपस्थि
तित्वादिना हेतुत्वे पदभेदेनानन्तकारणतायामवच्छेदकगौरवात् तदपेक्षयात्तत्स्थले तत्तत्पदानुपूर्वीज्ञानत्वेन हेतुता नोपदा
र्थोपस्थितेश्च सामान्यतो घटोपस्थितित्वकर्मत्वोपस्थितित्वाभ्यां हेतुताद्वयस्यन्याय्यत्वात् पदार्थोपस्थितिनिष्ठजनकताया
मानुपूर्वीज्ञानजन्यत्वस्यावच्छेदकत्वे पदार्थोपस्थितित्वेन समं तस्य विशेषणविशेष्यभावेपि विनिगमनाविरहापातात् चेन्न तदस
त् पदार्थोपस्थितेः सामान्यतो घटोपस्थितित्वादिना हेतुत्वे उक्तातिप्रसंगस्यैव वारणासंभवात् तथाहि अव्यवहितप्राक्क्षणा ताम १२
वच्छिन्नसामग्र्यधिकरणतायाः कार्योत्पत्तिव्याप्यत्वे किंचिद्द्वारककारणतावच्छेदकावच्छिन्नस्तोमस्यैव सामग्रीशब्देन विवक्ष

णीयः अन्यथास्मृतिस्वर्गाद्यव्यवहितप्राक्क्षणे निश्चयत्वायागत्वावच्छिन्नसत्वेन तद्घटितसामग्र्यसत्वात् तत्प्रसादस्य सामग्र्यनियम्याप
त्तेः एवं चोक्तस्थले साकांक्षपदज्ञानस्य सव्यापारकस्यासत्वेपि साक्षाज्जनकतावच्छेदकीभूततत्तत्पदार्थोपस्थितित्वावच्छिन्नघटि
तसामग्र्या अक्षतत्वमेवेति नच सामग्रीव्याप्तौ साक्षात्कारणतावच्छेदकावच्छिन्नानामिव व्यापारघटितकारणतावच्छेदकावच्छिन्नीय
व्यापारस्यापि सामग्रीशरीरेऽन्तर्भावनीयतया प्रकृतस्थले निराकांक्षपराधीनोपस्थितेराकांक्षाज्ञानजन्यत्वाभावात् आकांक्षाज्ञा
न ५ नजन्यव्यापारस्यासत्वात् न सामग्रीसमवहितत्वमिति वाच्यं उक्तस्थले एवयत्र साकांक्षनिराकांक्षपदयोः समूहालंबनमेकं ज्ञानं तत्रा
र्थोपस्थितेर्वस्तुगत्याकांक्षाविशिष्टपदविषयकं यज्ज्ञानं तज्जन्यत्वेन तद्व्यापारसंभवात् न च सद्द्वारककारणतावच्छेदको यो धर्मस्तदवच्छि क ५
न्नजनकतानिरूपकव्यापारसत्वमेव कार्योत्पादप्रयोजकं वक्तव्यं प्रकृते च समूहालंबनजन्योपस्थितेर्वास्तवाकांक्षाविशिष्टपदज्ञानजन्यत्वे
पि तादृशाकांक्षाविशिष्टपदज्ञानत्वेनाजनकत्वात् तत्सत्वं व्यवधानमकिंचित्करमेवेति वाच्यं तत्तत्पदार्थोपस्थितिं प्रति तत्तत्पदज्ञानत्वे
नैव हेतुत्वात् क्वचिदप्युपस्थितौ आकांक्षाविशिष्टपदज्ञानत्वेनाहेतुत्वात् प्रकृतस्थले तादृशव्यापारस्यैव दुर्लभत्वात् न च तत्तत्तदानुपूर्वी
विशेषज्ञानजन्यपदार्थोपस्थितित्वेन हेतुत्वमते प्युक्तसमूहालंबनानुपूर्वीज्ञानजन्यपदार्थोपस्थितिबलाद् घटकर्मत्वयोर्भेदान्वयबो

धोद्बुर्वारइतिवाच्यं घटमित्याद्यानुपूर्वीज्ञाननिष्ठघटपदज्ञानत्वावच्छिन्नजनकताकोपस्थितित्वेनहेतुत्वाभ्युपगमात् तादृशसमूहालंबनज्ञान
स्यचगृहीतवृत्तिककुंभादिपदज्ञानत्वेनैवतादृशोपस्थितिजनकत्वात् यत्तु स्वजन्यपदार्थोपस्थितिसंबंधेनाकांक्षानस्यसाक्षादेवशाब्दबोध
हेतुत्वंस्वीकारणीयंजन्यताचतत्तदानुपूर्वीविशेषात्मकाकांक्षाघटकतत्तत्पदज्ञानत्वावच्छिन्ननिरूपिताग्राह्या आकांक्षाविशिष्टपदज्ञा
१५ नजन्योपस्थितित्वेनहेतुत्वेप्युक्तस्थले समूहालंबनजन्योपस्थितिवारणायतादृशजन्यतानिवेशस्यावश्यकत्वात् एवंचदर्शितस्थलेआ
कांक्षाज्ञानजनकतावच्छेदकसंबंधात्मकतादृशोपस्थितिविरहान्नशाब्दबोधापत्तिरिति तदपिनसम्यक् स्वजन्यपदार्थोपस्थितिसंबंधे
नशाब्दबोधपूर्ववर्तित्वस्यस्वस्मिन्पदार्थोपस्थितिपूर्ववर्तित्वमगृहीत्वागृहीतुमशक्यत्वेनतेनसंबंधेनाकांक्षाज्ञानस्यान्यथासिद्धत्वा
त् तादृशोपस्थितित्वेनसंबंधतायांमानाभावाच्च। अन्यथास्वाश्रयज्ञानजन्यपदार्थोपस्थितिसंबंधेनाकांक्षाविषयकत्वादेरपिहेतु
तापाताच्चेति। अत्रोच्यते घटमित्याद्यानुपूर्वीज्ञानजन्यघटाद्युपस्थितित्वेनशाब्दबोधहेतुत्वेशक्यत्वस्यघटपटादिरूपानंतार्थभेदभि
न्नासुघटपटजन्यपदार्थोपस्थितिहेतुतासुअवच्छेदककोटौघटपदाव्यवहितोत्तरत्वाभ्यदत्वावच्छिन्नावगाहित्वस्यनिवेशाधिक्येना २४
नंतस्थलेकारणतावच्छेदककोटौगौरवात् तत्रतत्रघटपदत्वप्रकारकज्ञानजन्यतत्तदर्थोपस्थितित्वेनहेतुतानां घटमित्येतादृशा

नुपूर्वीज्ञानस्याप्यार्थविशेषमनिवेश्यतादृशानुपूर्वीज्ञानविशिष्टशाब्दत्वावच्छिन्नंप्रतितादृशानुपूर्वीज्ञानत्वेनैवहेतुतायाःकल्पनेलाघवादा
कांक्षाज्ञानेहेतुतासिद्धिः नचानुपूर्वीविशेषज्ञानजन्यतावच्छेदककोटौविषयानिवेशेघटादिपदज्ञानजन्यघटाद्युपस्थितित्वावच्छिन्नजन्यतावच्छे
दकघटकरणत्वादिशाब्दबोधसाधारणतादृशोपस्थितिविशिष्टशाब्दत्वेनसमंलक्षणयाघटपदार्थपटकर्मत्वबोधसाधारणस्यघटमित्येता
दृशानुपूर्वीज्ञानजन्यतावच्छेदकस्यव्याप्यव्यापकभावासंभवेनतयोः परस्परसहकारित्वंनसंभवतीतिवाच्यं। कार्यतावच्छेदकसामानाधिकर
ण्यमात्रस्यपरस्परसहकारितायांनियामकत्वात्। नचाम्यदस्यसुप्तिभक्तित्वेनलाक्षणिकत्वविरहात्कर्मत्वमेवार्थस्तथाचाम्यदज्ञानजन्योप
स्थितेर्नार्थभेदेनकारणताभेदइत्यम्यदत्वावच्छिन्नविषयकज्ञानजन्योपस्थितित्वेनावश्यकल्पनीयहेतुतायामेवावच्छेदककोटौअम्पद
ज्ञानांशेघटपदाव्यवहितोत्तरत्वावगाहित्वेननिवेशनमुचितंअम्यदत्वावच्छिन्नविशेष्यकघटपदाव्यवहितोत्तरत्वज्ञानत्वेनहेतुत्वांतरकल्प
नापेक्षयाक्लृप्तायामेकहेतुतायामवच्छेदकगौरवसहिष्णुतायान्याय्यत्वादितिवाच्यं। अमादिपदस्यापिशक्तिभ्रमेणकारणत्वादिबोधकत्वा
दित् तज्ज्ञानस्याप्यर्थभेदेनकारणताबाहुल्यात्। एवंसुप्तिभक्तेर्लक्ष्यार्थेअनादितात्पर्यमात्रंनकल्प्यतेनतुतस्यार्थांतरेलक्षणायाआधुनि
कतात्पर्यस्यचज्ञानसत्वेऽर्थांतरशाब्दबोधएवनजायतेतथाचलक्षणयाप्यमादेरर्थांतरबोधकत्वंमस्त्येवेत्यवधेयं। इदमत्रचिंतनीयं।
आकांक्षाज्ञानस्यशाब्दबोधहेतुतामतेयत्रक्षणोघटमित्येतादृशानुपूर्वीज्ञानजन्यपदार्थोपस्थितिर्विद्यतेतादृशज्ञानंतुविनष्टंतदुत्तरक्षणे

ते२

शाब्दबोधानुदयात्तदानींसमानविषयकानुमित्याद्युपपत्तयेतत्रसाब्दसामग्रीप्रतिबंधकतायांघटपदज्ञानजन्यघटोपस्थितिअम्यद्ज्ञानजन्यक
15 र्मत्वोपस्थितिवत्तादृशानुपूर्वीज्ञानमपिनिवेश्यंतथाचैषांत्रयाणामन्योन्यमन्येनत्वयोग्यताज्ञानादिरूपकारणेनसमंविशेष्यविशेषणभावे
विनिगमनाविरहेणसामग्रीप्रतिबंधकताबाहुल्यप्रसंगः अकांक्षाज्ञानजन्यपदार्थोपस्थितित्वेनहेतुत्वमतेतु कस्थलेआकांक्षाज्ञानना
प्रा४ शेपितज्ञान्यपदार्थोपस्थितिसत्वेनैर्द्वोधस्यैवोत्पत्यासमानविषयकानुमित्याद्युत्पादाभावेनतथाविधानुपूर्वीज्ञानजन्यघटकर्मत्वोपस्थि
निवे ५ तीर्निवेशनीये।तथाचतयोर्द्वयोरेवपरस्परमपरेणचकारणेनसमंविशेष्यविशेषणभावेविनिगमनाविरहेणप्रतिबंधकताबाहुल्यादेत
न्मतापेक्षयातन्मतेप्रतिबंधकताधिक्यंस्फुटं।नचानुपूर्वीविशेषज्ञानस्यशाब्दबोधहेतुतामतेअम्यदंघटपदाव्यवहितोत्तरत्वाभाववद्दित्या
दिमानसंप्रतितादृशेच्छाविरहविशिष्टायाघटपदज्ञानजन्यघटोपस्थित्यम्यद्ज्ञानजन्यकर्मत्वोपस्थितिघटितशाब्दबोधसामग्र्याःप्रतिबंध
कत्वाकल्पनेनलाघवंतादृशसामग्रीक्षणेअम्यदधर्मिकघटपदाव्यवहितोत्तरत्वनिर्णयस्यावश्यकतयातथाविधविपरीतनिश्चयवशादे राम
वतादृशमानसानुत्पादनिर्वाहादितिवाच्यंयादृशयादृशज्ञानेविपरीतनिश्चयविधयातथाविधानुपूर्वीज्ञानंविरोधितथाविधकतिपय ॥१५
ज्ञानेषुतादृशसामग्र्याःकतिपयप्रतिबंधकतात्रुटावपिसामानविषयकानुमितौघटपदादिविषयकानंतविधमानसादौचतथाधि
धसामग्रीप्रतिबंधकतायामुपदर्शितविनिगमनाविरहेणप्रतिबंधकताधिक्यप्रयुक्तगौरवस्याशक्यसमाधानत्वात् नचाकांक्षाज्ञा

न्स्यशाब्दबोधहेतुतामतेपिनोक्तत्रयंस्वातंत्र्येणसामग्रीप्रतिबंधकतायांनिवेशनीयं किंतुजन्यतासंबंधेनघटमित्येतादृशानुपूर्व्याः ज्ञा
नविशिष्टघटकर्मत्वोपस्थितीरेव तथाचनोक्तगौरवावकाशोनवातादृशानुपूर्वीनाशे तज्जन्यपदार्थोपस्थितिसत्वेसमानविषयका
नुमित्यनुपपत्तिः विशेषणाभावेनविशिष्टघटितसामग्र्यभावस्याक्षतत्वात् इतिवाच्यं तथासति यत्रघटपदत्वाम्यदत्वप्रकारकज्ञा
नादर्थोपस्थितिस्तदानीमेवचानुपूर्व्याः विशेषज्ञानंतत्रापि भवन्मतेशाब्दबोधोदयेनतत्रसमानविषयकानुमित्याद्यापत्तेः जन्यता
संबंधेनानुपूर्व्याः विशेषज्ञानविशिष्टपदार्थोपस्थितेरभावात् जनकतासंबंधेनपदार्थोपस्थितिविशिष्टानुपूर्व्याः विशेषज्ञानस्यनिवेश
मादायविनिगमनाविरहस्यदुर्वारत्वाच्च उपस्थितौतद्विशेषणीभूततादृशज्ञानेवाकारणांतरवैशिष्ट्यंनिवेश्यतद्वत्यत्रविनिगम
कदानस्याशक्यत्वाच्च अत्रेदंसमाधीयते॥ आकांक्षाज्ञानस्यस्वातंत्र्येणशाब्दबोधहेतुतामतेपितन्नाशानंतरंतज्जन्यपदार्थोपस्थि त ५
तिबलाच्छाब्दबोधः स्वीक्रियते पदार्थोपस्थितेस्तद्व्यापारत्वोपगमात् शाब्दबोधाव्यवहितप्राक्क्षणेतदसत्वेपिनतस्यकारण
त्वानुपपत्तिः एवंचभवन्मतइवैतन्मतेपिआनुपूर्व्याः विशेषज्ञानजन्यपदार्थोपस्थितीरेवसामग्रीप्रतिबंधकतायांनिवेशनीयेनतुस्वा
तंत्र्येणानुपूर्वीविशेषज्ञानमपीतिनोक्तगौरवावकाशः घटादिपदेध्वस्तुत्पन्नस्यकुंभादिपदेचध्वस्तुत्पन्नस्यपुंसोघटंकुंभः कर्मत्वमित्येता
दृशनानापदविषयकसमूहालंबनजन्यघटकर्मत्वाद्युपस्थित्यनंतरंशाब्दबोधापत्तिः घटपदज्ञानत्वावच्छिन्नजनकताकपदार्थोप

स्छितिरूपकारणाविरहेणैवनसंभवति। यत्रामूघटइत्येतादृशाविपरीतानुपूर्वीज्ञानजन्यघटकर्मत्वयोरुपस्थितिर्वर्त्ततेतत्रघटमित्येता
दृशानुपूर्वीज्ञानव्यापारस्यविरहादेवनशाब्दबोधापत्तिः। अव्यवहितप्राक्क्षणेकरणव्यापारसमवधानस्यापिकार्योत्पत्तावपेक्षितत्वात्।
एवंचतादृशस्थलएवघटमित्याद्यानुपूर्वीज्ञानजन्यध्वंसंस्कारादिकंवर्त्ततेतत्रापिनातिप्रसंगः ध्वंससंस्कारादेरानुपूर्वीज्ञानजन्यत्वेपिघ
10 टकर्मत्वान्वयबोधजनकताविरहेणव्यापारताविरहात्। तज्जन्यत्वेसतिप्रकृतकार्यासाधारणजनकस्यैवतद्व्यापारत्वात्। नन्वतादृशस्छ
लएवघटमित्याद्यानुपूर्वीज्ञानजन्यातादृशानुपूर्वीघटकर्मत्वयत्किंचिद्विषयिणीप्रकृतशाब्दबोधोपयिकयोग्यतादिविषयित्वज्ञानस्य
नप्रतिबंधकत्वकल्पनमेवोचितं नचकर्मत्वपदंघटपदनिराकांक्षमित्येतादृशज्ञानदशायांघटमित्याद्यानुपूर्वीज्ञानादपिशाब्दबोधानुपप
त्तिः तत्पदद्वयज्ञानजन्यशाब्दबोधेतदेकतरधर्मिकापरपदाकांक्षाविरहज्ञानत्वेनप्रतिबंधकत्वंचनसंभवति घटपदकर्मत्वपदज्ञानजन्य
त्वघटकर्मत्वयोर्भेदान्वयबोधरूपप्रतिबध्यस्याप्रसिद्धेः घटपदाम्पदज्ञानजन्यघटकर्मतयोर्भेदान्वयबोधेअम्पदधर्मिकघटपदाकां
क्षाविरहज्ञानस्यप्रतिबंधकतयाचघटः कर्मत्वमित्यादिवाक्याच्छाब्दबोधापत्तिर्दुर्वारैवेतिवाच्यं घतोघटः कर्मत्वमित्यादिपदज्ञानाद्घ
टकर्मत्वयोर्भेदान्वयबोधवारणायनिराकांक्षात्वज्ञानस्यप्रतिबंधकताकल्प्यते तत्रघटपदत्वाम्पदत्वादिप्रकारकज्ञानजन्यघटकर्म २६
त्वोपस्थितिरूपकारणविरहेणैवतादृशान्वयबोधवारणसंभवात् भवन्मतेपिपदार्थोपस्थितीनांतादृशरूपेणकारणताया आ

णीस्मृतिर्दैववशेनोत्पन्नाना तत्र तादृशस्मृतेस्तथाविधानुपूर्वीज्ञानजन्यत्वेन प्रकृतशाब्दबोधजनकत्वेन च व्यापारत्वसंभवाच्छाब्दबो
धापत्तिर्दुर्वारैवेति वाच्यं· करणजन्यतावच्छेदकीभूतो यः प्रकृतकार्यजनकतावच्छेदकधर्मस्तदवच्छिन्नस्यैव प्रकृते व्यापारपदेन विवक्षणा
त् प्रकृतशाब्दबोधजनकतावच्छेदकयोग्यताज्ञानत्वादेर्घटमित्येतादृशानुपूर्वीज्ञानजन्यतावच्छेदकत्वविरहेणतादृशस्मृतेरतथात्वात्· न चैवं· घटा
द्युपस्थितेरपि तद्व्यापारत्वासंभवः घटपदज्ञानत्वावच्छिन्नजनकताकघटोपस्थितित्वादेर्घटपदज्ञानादिजन्यतानवच्छेदकत्वादितिवाच्यम्· तादृश
धर्मस्यात्माश्रयभियापदज्ञानजन्यतानवच्छेदकत्वेपियादृशानतिप्रसक्तधर्मस्तज्जन्यतावच्छेदकस्तेन रूपेणैव शाब्दबोधहेतुतायाः स्वकरणी
यतयानुपपत्तिविरहात्· यत्र करणजन्यतावच्छेदकस्य फलजनकतावच्छेदकत्वं संभवति तत्रैवेयं रीतिः। अन्यत्र च साक्षात्कारणतावच्छेदकावच्छिन्न
वे६ समवधानमेव कार्योत्पत्तिप्रयोजकमुपेयं· कलशमित्याद्यानुपूर्वीज्ञानजन्यशाब्दबोधे घटमित्याद्यानुपूर्वीज्ञानस्य व्यभिचारवारणाय चास्त्वाव्यव घ६
हितोत्तरोपस्थित्यव्यवहितोत्तरत्वसंबंधेन तत्तदानुपूर्वीज्ञानविशिष्टत्वं तत्तदानुपूर्वीज्ञानजन्यतावच्छेदकमुपेयं· अत आनुपूर्वीज्ञाननाशानंतरोत्पन्नत
ज्जन्योपस्थितिजन्यशाब्दबोधस्य नासंग्रह इति दिक्· यत्तु आकांक्षासंशयात् शाब्दबोधानुत्पत्त्या आकांक्षानिश्चयत्वेनैव शाब्दबोधहेतुता वाच्या· तथा
च तदपेक्षया लाघवान्निराकांक्षत्वज्ञानत्वेन प्रतिबंधकत्वकल्पनमेवोचितं न च कर्मत्वपदं घटपदं निराकांक्षमित्येतादृशज्ञानदशायां घटमित्याद्यानुपू
र्वीज्ञानादपि शाब्दबोधानुपपत्तिः तत्पदद्वयज्ञानजन्यशाब्दबोधे तदेकतरधर्मिकापरपदाकांक्षाविरहज्ञानत्वेन प्रतिबंधकत्वं च न संभवति घटपदकर्म
त्वपदज्ञानजन्यस्य घटकर्मत्वयोर्भेदान्वयबोधरूपप्रतिबध्यस्याप्रसिद्धेः घटपदाम्पदज्ञानजन्ये घटकर्मतयोर्भेदान्वयबोधे अम्पदधर्मिकघटपदाकांक्षाविरह

१ ज्ञानस्य प्रतिबंधकतया च घटः कर्मत्वमित्यादिवाक्याच्छाब्दबोधापत्तिर्दुर्वारैवेति वाच्यं अतो घटः कर्मत्वमित्यादिपदज्ञानाद्घटकर्मत्वयोर्भेदान्वयबोधवारणा
यन निराकांक्षत्वज्ञानस्य प्रतिबंधकता कल्प्यते तत्र घटपदत्वाम्पदत्वादिप्रकारकज्ञानजन्यघटकर्मत्वोपस्थितिरूपकारणाविरहेणैव तादृशान्वयबोध
२ आवश्यकत्वस्य प्रागेव दर्शितत्वात् अपि त्वम्पघटइत्येतादृशविपरीतानुपूर्वीकपदज्ञानात्तादृशशाब्दबोधापत्तिवारणायैव तथा चाम्पद
त्वप्रकारकज्ञानजन्यशाब्दबोधे अम्पदत्वावच्छिन्नधर्मिकघटपदोत्तरत्वाभावप्रकारकज्ञानत्वेनैव प्रतिबंधकत्वं कल्प्यते तत्र च नानु
17 पपत्तिलेशोपि न च यत्राम्पदे घटपदाव्यवहितोत्तरत्वाभावज्ञानं वर्त्तते कलशमित्याकारकानुपूर्वीज्ञानं च तत्र स्यशाब्दबोधे तथाविध
निराकांक्षत्वज्ञानाभावस्य व्यभिचार इति वाच्यं स्वसामानाधिकरण्यावच्छिन्नस्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वसंबंधेन तथाविधनि
राकांक्षत्वज्ञानवदन्यत्वस्यैव तदभावजन्यतावच्छेदकत्वोपगमात् तत्तत्पदत्वप्रकारेण निराकांक्षत्वाभावज्ञानतत्तत्पदत्वप्रकारकज्ञानजन्य
पदार्थोपस्थितीनां चान्योन्यसहकारेणैव फलोपधायकत्वोपगमान्नातिप्रसंगः यत्र चाम्पदत्वे धर्मितावच्छेदकीकृत्य न घटपदाव्यवहितोत्त
रत्वज्ञानं न वा तदभावज्ञानं तत्रापि अम्पदत्वादिप्रकारकज्ञानादिष्यत एवान्वयबोध इति तदसत् संशयसाधारणस्याकांक्षाविरहग्रहस्य
प्रतिबंधकत्वेऽप्रामाण्यनिश्चयत्वावच्छिन्नाभावस्यैव निवेशनीयतया गौरवात् आकांक्षानिश्चयत्वावच्छिन्नहेतुतायामप्रामाण्यज्ञान
त्वावच्छिन्नाभावभावस्यैव निवेशनीयत्वात् एवं निराकांक्षत्वज्ञानस्य प्रतिबंधकत्वे घटपदामुपदप्रकारकज्ञानजन्यपदार्थोपस्थि
तिघटानुमितिसामग्रीप्रतिबंधकतायामेकत्रैवामुपदत्वावच्छिन्नधर्मिकघटपदाकांक्षाभावग्रहाभावघटपदत्वावच्छिन्नधर्मि ८
काम्पुपदत्वावच्छिन्नाकांक्षाभावग्रहाभावौ निवेशनीयौ तथाविधैकतरज्ञानाभावएव शाब्दबोधानुदयेन समानविषयकानुमि

वारणसंभवात् संबन्धेनैव पदार्थोपस्थितीनां
नादृशसंबन्धेन कारणतायां १

त्युत्पन्नेरितितयोर्मिथोविशेष्यविशेषणभावेविनिगमनाविरहेणगौरवं।अस्मन्मतेचामुपदत्वावच्छिन्नधर्मिकघटपदसा
कांक्षत्वग्रहघटपदत्वावच्छिन्नधर्मिकामुपदसाकांक्षत्वग्रहयोरेकतरसत्वएवकार्योत्पत्त्यातादृशज्ञानयोरेकैकंनिवेश्य
पृथक्पृथक्कारणत्वयोःकल्पनयातयोर्मिथोविशेष्यविशेषणभावेविनिगमनाविरहस्याप्रसक्तेःएवंनिराकांक्षत्वज्ञानस्य
प्रतिबंधकतामतेऽमुपदत्वादिसमानाधिकरणेनघटादिपदेनोत्तरामुपदेघटपदाव्यवहितोत्तरत्वाभावग्रहेघटमित्याद्यानुपूर्वी
६५ ज्ञानाच्छाब्दबोधानुदयप्रसंगः नचतत्तदमुपदत्वावच्छेदेनघटपदाव्यवहितोत्तरत्वाभावग्रहस्यैवप्रतिबंधकतायाउपगंतव्यत
यानायंदोषइतिवाच्यं।तथासतिपदव्यक्तिभेदेनानंतप्रतिबंधकताप्रसंगात्।नचाकांक्षाज्ञानस्यापिपदव्यक्तिभेदेनकारण
ताभेदआवश्यकःएकधर्मिकाकांक्षाज्ञानदशायांसमानानुपूर्वीकपदव्यक्त्यंतरमात्रधर्मिकतत्तदर्थपरत्वग्रहसत्वेशाब्दबो
पत्तिवारणायतत्तत्पदधर्मिकाकांक्षाज्ञानत्वतथाविधतात्पर्यज्ञानत्वाभ्यांशाब्दबोधहेतुतामभ्युपेत्यतादृशाकांक्षाज्ञान
तात्पर्यज्ञानयोःपरस्परसहकारस्यावश्यकत्वात्तदितिवाच्यं।घटपदाव्यवहितोत्तरामुपदंघटकर्मत्वपरमित्याकारकस्या
नुपूर्वीविशेषधर्मितावच्छेदककतात्पर्यज्ञानस्यैवशाब्दबोधहेतुत्वोपगमेनोक्तातिप्रसंगविरहेणैवशाब्दबोधानुत्पाद

संभवादितिवाच्यं। तादृशतात्पर्यज्ञानस्यैवाकांक्षाज्ञानतया तद्धेतुतयैवाकांक्षाज्ञानहेतुतासिद्धेः। आनुपूर्वीविशेषधर्मितावच्छे
18 दककतात्पर्यग्रहस्यतात्पर्यधर्मितावच्छेदककानुपूर्वीविशेषज्ञानस्यवाहेतुत्वमित्यत्रविनिगमनाविरहेणकारणताद्वयस्य
प्रसक्तावपिपदव्यक्तिभेदेनकारणताभेदकल्पनापेक्षयालाघवस्याक्षतत्वात्। नचमन्मतेपिविशेष्यतासंबंधावच्छि
न्नप्रतियोगिताकनिराकांक्षत्वज्ञानाभावविशिष्टविशेष्यकतात्पर्यज्ञानत्वेनहेतुत्वोपगमान्नोक्तदोषइतिवाच्यं।
निराकांक्षत्वज्ञानेतत्तत्पुरुषीयत्वनिवेशेनगौरवादिति॥ ॥इतिश्रीरघुदेवभट्टाचार्यकृतआकांक्षाविचारः स
माप्तिः